International Journal of Sanskrit Research 2022; 8(5): 14-16

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(5): 14-16
© 2022 IJSR
www.anantaajournal.com
Received: 13-05-2022
Accepted: 19-06-2022

**Shivananda Behera**
Research Scholar,
School of Sanskrit & Indic Studies, Jawaharlal Nehru University, New Delhi, India

**Corresponding Author:**
**Shivananda Behera**
Research Scholar,
School of Sanskrit & Indic Studies, Jawaharlal Nehru University, New Delhi, India

# आचार्यभर्तृहरिदिशा प्रतिभाविवेचनम्

**Shivananda Behera**

**शोधसारः** प्रतिभा इति शब्दं शृत्वैव पाठकानां बुद्धौ संस्कृतसाहित्यानां लक्षणग्रन्थेषु विवेचितविषयस्य काव्यहेतोः अवबोधो भवति । तत्र आनन्दवर्धनादयः महान्तो कवयः काव्यहेतुं विवेच्य तत्रापि कविप्रतिभाम् अनिवार्यतत्त्वरूपेण प्रतिपादितवन्तः । मम्मटाचार्याः अपि शक्तिरूपेण प्रतिभामेव विवेच्य काव्यहेतोः अनिवार्याङ्गत्वेन सुसाधितवन्तः । अथ प्रतिभाशब्देन किमसौ काव्यहेतुरेव गृह्यते? उत तदनेन कवित्वबीजमेव गृह्यते? नैव, तत्र सर्ववेदपारिषदि व्याकरणशास्त्रेऽपि अस्ति कोपि प्रतिभाशब्दको विषयः । तद्दर्शनसम्प्रदाये सुप्रसिद्धाः वैयाकरणाः भर्तृहरिनामकाः आचार्याः स्वीये ग्रन्थे वाक्यपदीये विषयमिमं विस्तृततया वर्णयन्ति । तद्दिशा शोधऽऽलेखे पत्रे वाऽस्मिन् प्रतिभायाः विवेचनम् अनुसन्धात्रा करिष्यते ।

**प्रमुखशब्दाः** प्रतिभा, शब्दब्रह्म, वाक्, पश्यन्ती, संहृतक्रम, सृष्टिः, संहारः इत्यादयः ।

## प्रस्तावना

तत्र व्याकरणदर्शनं दर्शनप्रविभागेषु अद्वैतदर्शनत्वेन परिगण्यते । तदनुसारेण अनादि निधनं शब्दतत्त्वम् एकमेव, तद्व्यतिरिक्ताः समेऽपि पदार्थाः शब्दस्यैव विवर्ताः परिणामाः वा । एकैव शब्दब्रह्म संसाररूपेण विवर्तितः सन् अनेकैः स्वरूपैः जगति जगद्रूपेणैव आभासते । ननु प्रणवः एव ब्रह्मेति आचार्यः भर्तृहरिरेव महाभाष्यदीपिकायां प्रतिपादितम् - ज्ञाने किं सत्यम् ? ओम्, अथ तद् ब्रह्म ।[1] शब्दब्रह्मणः वागवस्थायां त्रयो भेदाः, ते च इमे क्रमाद् - पश्यन्ती, मध्यमा, वैखरीति । अत्र तावद्वैखरी स्थूला, मध्यमा तदपेक्षया सूक्ष्म, पश्यन्ती च सूक्ष्मतमा चिद्रूपा । सा ह्यविभागा, संहृतक्रमा, अनपायिनी, अभेदा च, ततः (पर) पश्यन्ती वागवस्था शब्दब्रह्मणः अपरपर्यायः । पश्यन्ती एव प्रतिभा इत्यग्रे प्रतिपाद्यते-
प्रतिभापदेन वाग्विकाराणां वैखरीमध्यमादीनां प्रकृतिं निर्दिशति आचार्यभर्तृहरिः । तत्र तु वाग्योगविद्वैयाकरणः प्रथमतया वाचः साध्वसाधुमिश्रितरूपं जानाति, ततः असाधुशब्दानां परित्यागपूर्वकं वाच्यवाचकोभयात्मिकां मध्यमां वाचं जानाति । ततोऽपि वाग्विकाराणां प्रकृतिरूपां प्रतिभां प्राप्नोति । तत्र वाक्यपदीये- सोऽव्यतिकीर्णां वागवस्थामधिगम्य वाग्विकाराणां प्रकृतिं प्रतिभामनुपरैति ।[2]

---

[1] भर्तृहरि, महाभाष्यदीपिका

[2] वाक्यपदीयम् १/१४ स्वोपज्ञवृत्तिः

सा हि प्रतिभा समेषामपि शब्दार्थानां कारणरूपा बुद्धिः। सैव पश्यन्ती वाग्। ततः एव शब्दाः प्राणवृत्तिम् अनुपतन्ति। तां प्रतिभां वैयाकरणः क्रमेण अन्वाप्नोति। समेषामपि भावविकाराणासमुत्पत्तौ अनुगुणत्वात् प्रतिभा एव सत्तानुगुण्यमात्रा, भावविकाराणां च इयमेव योनिः। तदनया स वैयाकरणः पराप्रकृतिं प्राप्नोति। पराप्रकृति च सा, यत्र भावविकाराणामपि भानम्, उल्लेखोऽस्तं याति। तस्माच्च सत्तानुगुण्यमात्रात् प्रतिभाख्याच्छब्दपूर्वयोगभाव-नाभ्यासापेक्षात् प्रत्यस्तमितसर्वविकारोल्लेखमात्रां परां प्रकृतिं प्रतिपद्यते।[3] प्रतिभा हि बुद्धिः, प्रतिभायां बुद्धौ आत्मा स्वरूपं यस्य गोचरता सा प्रतिभात्मा[4], इति विग्रहे समानविभक्तिकप्रयोगाद्, समानाधिकरण्याद् वा। तदेतस्मात् विग्रहाद् वाच्यपदार्थः एव प्रतिभात्मा इति सिद्ध्यति, तस्य हि वुद्धौ गोचरता परिलक्ष्यते।

शब्दब्रह्मणः प्रवृत्तिः, क्रिया, षड्भावविकाराः। षड्भावविकाराश्च इमे - जायते, अस्ति, विमरिणमते, वर्धते, अपक्षीयते, विनश्यति। अथैतेषां तत्त्वं सत्ता वा परब्रह्मरूपं शब्दब्रह्म। सा च सत्ता प्रतिभाख्या। प्रतिभा एव षड्भावविकाराणां प्रकृतिः। सा हि साध्यसाधनशक्तिरूपा। जन्यं जगदेतद् हि साध्यसाधनरूपात्मकं, तज्जनकत्वाद् प्रतिभापि तच्छक्तिरूपा। अथ तज्ज्ञः, वैयाकरणः।[5] वैयाकरणो हि साधुशब्दान् प्रयुङ्क्ते, अथ तस्मिन् धर्मः। तस्य अभ्यासात् वैयाकरणः, शब्दप्रवृत्तितत्त्वज्ञः ब्रह्मम् अश्नुते, अभेदेन साक्षात्करोति, सायुज्यं लभते वा। तच्च ब्रह्म जरामरणादिविवर्जितम्। तदेव शब्दब्रह्मणः प्राप्तिरपि प्रतिभाज्ञानाद् भवति। उक्तं च वाक्यपदीये - तदभ्यासाच्च शब्दपूर्वकं योगमधिगम्य प्रतिभां तत्त्वप्रभवां भावविकाराप्रकृतिं सत्तां साध्यसाधनशक्तियुक्तां सम्यगवबुद्ध्य नियता क्षेमप्राप्तिरिति।[6]

तदेवं वाग्विकाराणां प्रकृतिः प्रतिभा। अतः संहारकाले, संवर्तकाले वा समेषामपि वाग्विकाराणां उपसंहारोऽस्यामेव प्रतिभायां भवति। अथ च प्रतिभायाः उपसंहारः पराप्रकृतौ ब्रह्मणि[7] वा भवति। यथा विकारापगमे सुवर्णालङ्काराणां तेषां प्रकृतौ, कारणभूते सुवर्णे उपसंहारो भवति, तथैव। तदाह भर्तृहरिः-

विकारापगमे सत्यं सुवर्णं कुण्डले यथा।
विकारापगमे सत्यां तथाहुः प्रकृतिः पराम्॥[8]

सृष्ट्यादौ एव प्रतिभायाः उत्पत्तिरिति भगवान् भर्तृहरिः व्याक्यपदीये उल्लिखति। तत्र सृष्टिप्रलयवादीनां मतं विवेचयति। तन्मतानुसारिभिरुच्यते, इदम्प्रथमतया पराप्रकृतेः प्रतिभा समुत्पद्यते। सैव महान्नात्मा, सत्ता, अविद्यायोनिः वा।[9] अस्याः एव अविद्यायारुत्पत्तिः। सर्वविकाराः असद्रूपाः भवन्ति, तस्मात् ते अविद्यात्मिकाः, अथ तासामुत्पत्ति अस्याः एव प्रतिभायाः संभवति। तया प्रतिभया सह ऋषयोऽपि उत्पद्यन्ते। प्रतिभारूपेणैव ऋषिणामप्युत्पत्ति भवतीति तत्र व्याख्यातम्। ततः ऋषयोऽपि ब्रह्मणः एव विवर्तन्ते। श्रीवृषभो तत्र व्यख्याति- यदा प्रतिभा विवर्तते तदैवेके ऋषयस्तया सहैव विवर्तन्ते ....ते प्रतिभास्वभावा बुद्धिस्वभावा एते तया सहोत्पन्ना इति कथयति।[10] इत्येतद् भर्तृहरिदिशा एव श्रीवृषभेण व्याख्यातम्।

तत्र भवता भर्तृहरिणा वाक्यपदीये द्वितीये काण्डे प्रतिभायाः स्वरूपं वाक्यार्थत्वेनापि विश्लेषितम्। अथ किं वाक्यम्? कः वा वाक्यार्थः? इति चेदुच्यते अखण्डशब्दः यो वुद्धौ अवधार्यते स स्फोटः ( अखण्डवाक्यस्फोटः ) अथ च वुद्धावेव स्फोटाभिन्नत्वेन प्रकाशते योऽर्थः सः वाक्यार्थः। स एव प्रतिभारूपः। तदेतत्सुस्पष्टं यत् स्फोटः अर्थप्रकाशको शब्दः, तद्वाच्या प्रतिभा। उक्तश्च - ..एका प्रतिभा पदार्थमतिव्यतिरिक्तैव जायते तां च वाक्यार्थं वैयाकरणा आहुः।[11] इति

उच्यते च सर्वः यः कश्चिच्छब्दः स प्रतिभाहेतुः।[12] प्रतिभायाः हेतुरित्यर्थः। वर्णात्मको वा, पदात्मको वा, वाक्यात्मको योऽपि शब्दः सः प्रतिभाया एव हेतुः। तत्र बालानामपि भवतु, तिरश्चामपि भवतु, विदितसङ्केतानाम्, अविदितसङ्केतानां बुद्धिमतां वा शब्दः सोऽपि। यथा करतालनिनादेन काकाः पलायन्ते, छात्राणामवकाशाय अध्ययने प्रवृत्तये वा घटिकायाः शब्दः। गोमहिषादीनां वारणाय शब्दः उच्चार्यते, शिशुः क्रन्दनध्वनिना वक्ति, नियतध्वनिना आलपति च। तदनेन प्रकारेण सर्वजनसंवेद्या

---

[3] वाक्यपदीयम्, १/ १४ स्वोपज्ञवृत्तिः
[4] वाक्यपदीयम्, १/११८, अम्बाकर्त्रीव्याख्या
[5] तस्य प्रवृत्तितत्त्वज्ञस्तद् ब्रह्मामृतमश्नुते। वाक्यपदीयम् १/१२२
[6] वाक्यपदीयम् १/१२२, स्वोपज्ञवृत्तिः
[7] तादेवं वाग्विकारं प्रतिभायामुपसंहरति। तामपि चास्मिन् ब्रह्मणि। वाक्यपदीयम् १/१४, श्रीवृषभः
[8] वाक्यपदीयम्, द्रव्यसमुद्देशः
[9] ...प्रतिभात्मनि विवर्तन्ते सत्तालक्षणं, महान्तमात्मानमविद्यायोनिं पश्यन्तः प्रतिबोधेनाभिसम्भवन्ति। वाक्यपदीयम् १/१३६ स्वोपज्ञवृत्तिः
[10] वाक्यपदीयम् १/१३६, श्रीवृषभः
[11] वाक्यपदीयम् १/१४३ स्वोपज्ञवृत्तिः
[12] वाक्यपदीयम् २/११७ पुण्यराजकृता टीका

खलु प्रतिभा । तैश्शब्दैः तेषां व्यवहारे प्रवृत्तिः प्रतिभापुरस्सरमेव भवति । उच्यते च-

अभ्यासात् प्रतिभाहेतुः शब्दः सर्वोऽपरैः स्मृतः ।
बालानां च तिरश्चां च यथार्थप्रतिपादने ॥ [13]

अथ सा प्रतिभा कथञ्चिदपि- इदं तदिति प्रकारेण अनाख्येया, केवल संवेद्यसिद्धा खलु सा, संवेदकैरपि संवेदनकाले नियतरूपेण निरूपयितुमशक्या । असौ हि वाक्यार्थः प्रतिभा वा असंसृष्टानामपि पदार्थानां मेलनं करोति, सम्पूर्णेऽपि वाक्ये तावद्विषयत्वेन तिष्ठति, प्रतिभानिष्ठा एव पदार्थाः साफल्यं भजन्ते । प्रतिभाम् अतिक्रम्य न किञ्चिद् वर्तते इति । सा व्यवहारकाले कदाचित्साक्षाच्छब्देन जन्यते, बहुशास्त्रश्रवणाभ्यासेन वा साक्षाज्जनिता सा । बालानामथ तिरश्चां सैव वर्तते । यथा गजाश्वाश्वानादयः पशुपक्षिणः वा आयुराधारेण स्वजात्यनुकुलं मित्रैः, शत्रुभिः सह वा तदनुकुलव्यवहरन्ति । बालाश्च कदाचिदशिक्षितापि समवयस्यैः सह अनुरूपं व्यवहरन्ति । सर्वोऽपि व्यवहारः प्रतिभामूलकः एवेति । ततः एव पशुपक्षीणां जातमात्राणामपि प्रतिभावशादेव व्यवहारः । सर्वेऽपि स्वप्रतिभामेव प्रमाणरूपेण पश्यन्ति ।[14]

प्रतिभा तु जन्मजन्मान्तराभ्यासहेतुका, यथा - वसन्ते कोकिलः पञ्चमस्वरानुकुलं शब्दं कुरुते, लूता स्वयमेव तन्तुं रचयति, श्वानादिषु स्वामिभक्तादिगुणान् को वा प्रददाति ? सिंहस्य मांसरुधिरादिकेषु प्रीतिं वा कः जनयति ? गोऽश्वेषु तृणान् प्रति वा ? प्रत्येकेषु जन्तुषु स्वनियतभोजनं प्रति रुचिः, तदनुकुलो व्यवहारोऽपि प्रतिभायाः महात्म्येन एव । ततः कवित्वहेतुरपि प्रतिभा एव । तद्प्रतिभायाश्च शब्द एव मूलतत्वम् । स च शब्दः द्विविधः - आसत्ति, विप्रकर्षश्च । आसत्ति इति अस्मिन् जन्मनि, तदन्यस्मिन् जन्मान्तरे वा प्रतिभायः मूलः शब्दः एव ।[15]

सा च प्रतिभा षड् विधा - १. काचित् स्वाभाविकी प्रतिभा, तद्यथा पराप्रकृतेः सत्तायाः प्रति या आनुगुण्यता । अथवा शाखाभ्यः शाखान्तरं प्रति कपेः चेष्टा । २. चरणनिमित्ता, चरण इत्युक्ते तपश्चरणनिमित्ता वा स्वाध्यायादौ प्रवृत्तिर्वा । तद्यथा वसिष्ठादीनाम् महर्षीणाम् । ३. अभ्यासनिमित्ता- तद्यथा कूपतडागादिकार्ये ये सिद्धाः ते खननात्प्रागेव जानन्ति जलविषयकं ज्ञानम् । ४. योगनिमित्ता - तद्यथा योगसिद्धाः पुरुषाः परेषां चित्तगताभिप्रायान् योगबलेन जानन्ति । ५. अदृष्टनिमित्ता - तद्यथा राक्षसपिशाचादयः परेषां शरीरेषु प्रविशन्ति, अन्तर्धानादि विद्यां व्यवहरन्ति । ६. विशिष्टैरुपहिता प्रतिभा- तद्यथा महाभारते कृष्णद्वैपायनो सञ्जयाय अतिदूरादेव दर्शनार्थं दिव्यदृष्टिं प्रदत्तवान्, सैषा प्रतिभा । तदाह भगवान् भर्तृहरिः-

स्वभावचरणाभ्यासयोगादृष्टोपपादिताम् ।
विषिष्टोपगतां चेति प्रतिभां षड् विधां विदुः ॥ [16]

तदनेन प्रकारेण व्याकरणाचार्येण भर्तृहरिणा प्रतिभातत्त्वं विवेचितम् । सा हि सर्वव्यवहारमूला, चेष्टामूलाऽपि सा । सैव स्फोटादभिन्नत्वेन बुद्धावेवावतिष्ठते । सा हि पश्यन्तीरूपा, तज्ज्ञः शब्दब्रह्मामृतमश्नुते । अथ तद् निश्चप्रचमेव पाठकैर्ज्ञातव्यमिति ।

[13] वाक्यपदीयम् २//११७

[14] सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणं प्रवृत्तयः। (अभिज्ञा०), वाक्यपदीयम् २/१४७, पुण्यराजकृताटीका

[15] वाक्यपदीये २/१४३- १५१

[16] वाक्यपदीयम् २/१५२

## सन्दर्भग्रन्थसूची


1. वाक्यपदीयम् (विवरण टीका) डा० शिवशंकर अवस्थी, वाराणसी : चौखम्बा विद्या भवन, पुनर्मुद्रित संस्करण - २०१३।
2. वाक्यपदीयम् ब्रह्मकाण्डम् (भावप्रदीपव्याख्या), सम्पादकः - प० श्री रमगोविन्दशुक्लः, वाराणसी: चौखम्बा संस्कृत सीरीज आफिस, १९६१ ।
3. वाक्यपदीयम् द्वितीयकाण्डम् (पुण्यराजकृताटीकासहितम्), अम्बाकर्त्रीटीका, सम्पादकः- प० रघुनाथ शर्मा, वाराणसी: स०स० विश्वविद्यालय, १९८८ ।
4. व्याकरणदर्शनभूमिका, रामाज्ञा पाण्डेय, काशी: राजकीयसंस्कृतपुस्तकालयः, सरस्वतीभवनम्, १९५४ ।
5. वाक्यपदीयब्रह्मकाण्डः, प्रत्येकार्थप्रकाशिका टीका, सम्पादकः- म० म० द्रव्येश झा, दिल्ली: मन्दाकिनीसंस्कृतविद्वत्परिषद्, २००२ ।
6. संस्कृतव्याकरणदर्शन, रामसुरेश त्रिपाठी, दिल्ली: राजकमल प्रकाशन, प्रथम संस्करण १९७२ ।
7. संस्कृतव्याकरणशास्त्र का इतिहास- १, युधिष्ठिर मीमांसक, सोनीपत : रामलाल कपूर ट्रस्ट, चतुर्थ संस्करण- विक्रम सम्बत् २०४१ ।
8. सवृत्तिवाक्यपदीयद्वितीयकाण्डम् (पुण्यराजकृतटीकोपेतम्), सम्पादकः - के ०ए० सुब्रह्मण्य अय्यर महोदयः, दिल्ली: मोतीलाल बनारसीदास, १९८३ ।